শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ষটচৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটচৎৱারিংশঃ সর্গঃ ॥

## সুগ্রীৱেণ শ্রীরামং প্রতি স্বকীযভূমণ্ডলভ্রমণৱৃত্তান্তস্য প্রতিপাদনম্

গতেষু ৱানরেন্দ্রেষু রামঃ সুগ্রীৱমব্রৱীৎ।
কথং ভৱান্ ৱিজানীতে সর্ৱং ৱৈ মণ্ডলং ভুৱঃ॥ **4.46.1** ॥

সুগ্রীৱশ্চ ততো রামমুৱাচ প্রণতাত্মৱান্।
শ্রূযতাং সর্ৱমাখ্যাস্যে ৱিস্তরেণ ৱচো মম॥ **4.46.2** ॥

যদা তু দুন্দুভিং নাম দানৱং মহিষাকৃতিম্।
প্রতিকালযতে ৱালী মলযং প্রতি পর্ৱতম্॥ **4.46.3** ॥

তদা ৱিৱেশ মহিষো মলযস্য গুহাং প্রতি।
ৱিৱেশ ৱালী তত্রাপি মলযং তজ্জিঘাংসযা॥ **4.46.4** ॥

ততোঽহং তত্র নিক্ষিপ্তো গুহাদ্বারি ৱিনীতৱৎ।
ন চ নিষ্ক্রামতে ৱালী তদা সংৱৎসরে গতে॥ **4.46.5** ॥

ততঃ ক্ষতজৱেগেন আপুপূরে তদা বিলম্।
তদহং ৱিস্মিতো দৃষ্টৱা ভ্রাতুঃ শোকৱিষার্দিতঃ॥ **4.46.6** ॥

অথাহং গতবুদ্ধিস্তু সুৱ্যক্তং নিহতো গুরুঃ।
শিলা পর্ৱতসঙ্কাশা বিলদ্বারি মযা কৃতা॥ **4.46.7** ॥

অশক্নুৱন্নিষ্ক্রমিতুং মহিষো ৱিনশিষ্যতি।
ততোঽহমাগাং কিষ্কিন্ধাং নিরাশস্তস্য জীৱিতে॥ **4.46.8**॥

রাজ্যং চ সুমহৎ প্রাপ্য তারাং চ রুমযা সহ।
মিত্রৈশ্চ সহিতস্তত্র ৱসামি ৱিগতজ্ৱরঃ॥ **4.46.9**॥

আজগাম ততো ৱালী হৎৱা তং ৱানরর্ষভঃ।
ততোঽহমদদাং রাজ্যং গৌরৱাদ্ ভযযন্ত্রিতঃ॥ **4.46.10**॥

স মাং জিঘাংসুর্দুষ্টাত্মা ৱালী প্রৱ্যথিতেন্দ্রিযঃ।
পরিকালযতে ৱালী ধাৱন্তং সচিৱৈঃ সহ॥ **4.46.11**॥

ততোঽহং ৱালিনা তেন সোঽনুবদ্ধঃ প্রধাৱিতঃ।
নদীশ্চ ৱিৱিধাঃ পশ্যন্ ৱনানি নগরাণি চ॥ **4.46.12**॥

আদর্শতলসঙ্কাশা ততো ৱৈ পৃথিৱী মযা।
অলাতচক্রপ্রতিমা দৃষ্টা গোষ্পদৱৎ কৃতা॥ **4.46.13**॥

পূর্ৱাং দিশং ততো গৎৱা পশ্যামি ৱিৱিধান্ দ্রুমান্।
পর্ৱতান্ সদরীন্ রম্যান্ সরাংসি ৱিৱিধানি চ॥ **4.46.14**॥

উদযং তত্র পশ্যামি পর্ৱতং ধাতুমণ্ডিতম্।
ক্ষীরোদং সাগরং চৈৱ নিত্যমপ্সরসালযম্॥ **4.46.15**॥

পরিকাল্যমানস্তদা ৱালিনাভিদ্রুতো হ্যহম্।
পুনরাৱৃত্য সহসা প্রস্থিতোঽহং তদা ৱিভো॥ **4.46.16**॥

দিশস্তস্যাস্ততো ভূযঃ প্রস্থিতো দক্ষিণাং দিশম্।
ৱিন্ধ্যপাদপসঙ্কীর্ণাং চন্দনদ্রুমশোভিতাম্॥ **4.46.17**॥

দ্রুমশৈলান্তরে পশ্যন্ ভূযো দক্ষিণতোঽপরাম্।
অপরাং চ দিশং প্রাপ্তো ৱালিনা সমভিদ্রুতঃ॥ **4.46.18**॥

স পশ্যন্ ৱিৱিধান্ দেশানস্তং চ গিরিসত্তমম্।
প্রাপ্য চাস্তং গিরিশ্রেষ্ঠমুত্তরং সম্প্রধাৱিতঃ॥ **4.46.19** ॥

হিমৱন্তং চ মেরুং চ সমুদ্রং চ তথোত্তরম্।
যদা ন ৱিন্দে শরণং ৱালিনা সমভিদ্রুতঃ॥ **4.46.20** ॥

ততো মাং বুদ্ধিসম্পন্নো হনুমান্ ৱাক্যমব্রৱীৎ।
ইদানীং মে স্মৃতং রাজন্ যথা ৱালী হরীশ্ৱরঃ॥ **4.46.21** ॥

মতঙ্গেন তদা শপ্তো হ্যস্মিন্নাশ্রমমণ্ডলে।
প্রৱিশেদ্ যদি ৱৈ ৱালী মূর্ধাস্য শতধা ভৱেৎ॥ **4.46.22** ॥

তত্র ৱাসঃ সুখোঽস্মাকং নিরুদ্বিগ্নো ভৱিষ্যতি।
ততঃ পর্ৱতমাসাদ্য ঋষ্যমূকং নৃপাত্মজ॥ **4.46.23** ॥

ন ৱিৱেশ তদা ৱালী মতঙ্গস্য ভযাৎ তদা।
এৱং মযা তদা রাজন্ প্রত্যক্ষমুপলক্ষিতম্।
পৃথিৱীমণ্ডলং সর্ৱং গুহামস্যাগতস্ততঃ॥ **4.46.24** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ষটচৎৱারিংশঃ সর্গঃ ॥